# गीता ध्यानम्

ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं
व्यासेनग्रथितां पुराणमुनिना मध्ये महाभारतम् ।
अद्वैतामृतवर्षिणीं  भगवतिमष्टादशाध्यायिनीं
अम्ब त्वामनुसन्दधामि भगवद् गीते भवद्वेषिणीम्  ॥१॥

oṃ pārthāya pratibodhitāṃ bhagavatā nārāyaṇena svayaṃ
vyāsenagrathitāṃ purāṇamuninā madhye mahābhāratam ।
advaitā mṛtavarṣiṇīṃ bhagavatim aṣṭādaśā dhyāyinīṃ
amba tvām anusandadhāmi bhagavad gīte bhavadveṣiṇīm (1)

नमोऽस्तु ते व्यास  विशालबुद्धे  पुल्लारविन्दायतपत्रनेत्र ।
येन त्वया भारततैलपूर्णः प्रज्वालितो  ज्ञानमयः प्रदीपः ॥२॥

namo'stu te vyāsa viśālabuddhe phullāravindāyatapatranetra ।
yena tvayā bhāratatailapūrṇaḥ prajvālito jñānamayaḥ pradīpaḥ
||2||

प्रपन्नपारिजाताय  तोत्रवेत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय गितामृतदुहे  नमः ॥३॥

prapannapārijātāya  totravetraikapāṇaye ।
jñānamudrāya kṛṣṇāya gitāmṛtaduhe  namaḥ ॥3॥

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥४॥

sarvopaniṣado gāvo dogdhā gopālanandanaḥ ।
pārtho vatsaḥ sudhīrbhoktā dugdhaṃ gītāmṛtaṃ mahat ॥4॥

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं  कृष्णं वन्दे जगद् गुरुम् ॥५॥

vasudevasutaṃ devaṃ kaṃsacāṇūramardanam ।
devakīparamānandaṃ kṛṣṇaṃ vande jagad gurum ॥5॥

भीष्मद्रोणतटा जयद्रथजला गान्धारनीलोत्पला ।
शल्यग्राहवती कृपेणा वहनी कर्णेन वेलाकुला ।
अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी ।
सोत्तीर्णा खलु पाण्डवै रणनदि कैवर्तकः केशवः ॥6॥

bhīṣmadroṇataṭā jayadrathajalā gāndhāranīlotpalā ।
śalyagrāhavatī kṛpeṇā vahanī karṇena velākulā ।
aśvatthāmavikarṇaghoramakarā duryodhanāvartinī ।
sottīrṇā khalu pāṇḍavai raṇanadi kaivartakaḥ keśavaḥ ॥6॥

पाराशर्यवचः सरोजममलं गीतार्थगन्धोत्कटं
नानाख्यानककेसरं हरिकथासंबोधनाबोधितम्।
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा
भूयाद्भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे॥७॥

pārāśaryavacaḥ sarojamamalaṁ gītārthagandhotkaṭaṁ
nānākhyānakakesaraṁ harikathāsaṁbodhanābodhitam|
loke sajjanaṣaṭpadairaharahaḥ pepīyamānaṁ mudā
bhūyādbhāratapaṅkajaṁ kalimalapradhvaṁsi naḥ śreyase||7||

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।

यत्कृपा तमहं वन्दे परमानन्दमाधवम्  ॥८॥

mūkaṃ karoti vācālaṃ paṅguṃ laṅghayate girim ।

yatkṛpā tamahaṃ vande paramānandamādhavam ॥8॥

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैर्वेदैः

साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।

ध्यानावस्थिततद् गतेन मनसा पश्यन्ति यं योगिनो

यस्यान्तं न  विदुः सुरासुरगणा देवाय तस्मै नमः  ॥९॥

yaṃ brahmā varuṇendrarudramarutaḥ stunvanti divyaiḥ stavairvedaiḥ
sāṅgapadakramopaniṣadairgāyanti yaṃ sāmagāḥ ।
dhyānāvasthitatad gatena manasā paśyanti yaṃ yogino
yasyāntaṃ na viduḥ surāsuragaṇā devāya tasmai namaḥ ॥9॥